इति मार्कण्डेयपुराणे जैमिनिखण्डं पुराणं परि-
पूर्णम् ॥

शरिमा, [न्] पुं, ( शृणाति यौवनमिति । शॄ+ "हृभृधृसृस्तृशॄभ्य इमनिच् ।" उणा० ४।१४७। इति इमनिच् । ) प्रसवः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

शरी, स्त्री, एरकातृणम् । इति भावप्रकाशः ॥

शरीरं, क्ली, ( शॄ+ "कॄशॄपॄकटिपटिशौटिभ्य ईरन् ।" उणा० ४ । ३० । इति ईरन् । ) शीर्य्यते रोगादिना यत् । तत्पर्य्यायः । कलेवरम् २ गात्रम् ३ वपुः ४ संहननम् ५ वर्ष्म ६ विग्रहः ७ कायः ८ देहः ९ मूर्त्तिः १० तनुः ११ तनूः १२ । इत्यमरः ॥ क्षेत्रम् १३ पुरम् १४ घनः १५ अङ्गम् १६ पिण्डम् १७ । इति राजनिर्घण्टः ॥ भूतात्मा १८ स्वर्गलोकेशः १९ स्कन्धः २० पञ्जरः २१ कुलम् २२ बलम् २३ आत्मा २४ । इति जटाधरः ॥ स्कन्धम् २५ । इति शब्दरत्नावली ॥ इन्द्रियायतनम् २६ भूः २७ मूर्त्तिमत् २८ करणम् २९ वेरम् ३० सञ्चरः ३१ बन्धः ३२ पुद्गलम् ३३ । इति हेमचन्द्रः ॥ * ॥ शरीरधर्म्मा यथा,—

"शरीरे भस्मसाद्भूते प्रतिबिम्बः स चात्मनः ।
जीवस्तत्रान्तरीक्षस्थ उवाच विनयं विभुम् ॥
जीव उवाच ।
सदुक्तिर्व्वा कटूक्तिर्व्वा कोपः सन्तोष एव च ।
लोभो मोहश्च कामश्च क्षुत्पिपासादिकश्च यत् ॥
स्थौल्यं कार्श्यञ्च नाशश्च दृश्यादृश्यं समुद्भवम् ।
सर्व्वं शरीरधर्म्मश्च न जीवस्य न चात्मनः ॥
सत्त्वं रजस्तम इति शरीरं त्रिगुणात्मकम् ।
तच्च नानाप्रकारञ्च प्रबोध कथयामि ते ॥
किञ्चित् सत्त्वातिरिक्तञ्च किञ्चिदेव रजो-
ऽधिकम् ।
तमोऽतिरिक्तं किञ्चिच्च न समं कुत्रचिन्मुने ॥
सत्त्वाद्दया च सुक्तीच्छा कर्म्मेच्छा च रजो-
गुणात् ।
तमोगुणाज्जीवहिंसा कोपोऽहङ्कार एव च ॥
कोपात् कटूक्तिर्नियतं कटूक्त्या शत्रुता भवेत् ।
तया चाप्रियता सद्यः शत्रुः कः कस्य भूतले ॥
को वा प्रियोऽप्रियो वा कः किं मित्रं को
रिपुर्भुवि ।
इन्द्रियाणि च जीवानि सर्व्वत्र शत्रुमित्रयोः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २४ अः ॥ * ॥

अथ स्त्रीपुंसयोः सर्व्वाङ्गानि पादाग्रादिशिरःपर्य्यन्तानि । प्रपदम् १ अङ्घ्रिः २ गुल्फः ३ पार्ष्णिः ४ जङ्घा ५ जानु ६ ऊरुः ७ वङ्क्षणः ८ कटिः ९ त्रिकम् १० नितम्बः ११ स्फिक् १२ बस्तिः १३ उपस्थः १४ कुकुन्दरम् १५ जघनम् १६ जठरम् १७ नाभिः १८ वलिः १९ स्तनः २० चूचुकम् २१ क्रोडम् २२ रोम २३ कक्षः २४ अंसः २५ वक्षः २६ दोः २७ पार्श्वः २८ प्रगण्डः २९ कूर्परः ३० हस्तः ३१ प्रकोष्ठः ३२ मणिबन्धः ३३ अङ्गुलिः ३४ अङ्गुष्ठः ३५ करभः ३६ नखः ३७ पर्व्व ३८ चपेटकः ३९ कण्ठः ४० शिरोधिः ४१ श्मश्रु ४२ मुखम् ४३ ओष्ठः ४४ चिबुकम् ४५ हनुः ४६ सृक्कम् ४७ तालु ४८ रदः ४९ जिह्वा ५० नासा ५१ भ्रूः ५२ गण्डः ५३ लोचनम् ५४ अपाङ्गः ५५ तारा ५६ कर्णः ५७ भालः ५८ मस्तकम् ५९ केशः ६० । इति कविकल्पलता ॥ * ॥

परमेश्वरशरीरतो देवानामुत्पत्तिर्यथा,—

"सर्व्वे देवाः सपितरो ब्रह्माद्याश्चाण्डमध्यगाः ।
विष्णोः सकाशादुत्पन्ना इतीयं वैदिकी श्रुतिः ॥
अग्निस्तथाश्विनौ गौरी गजवक्त्रो भुजङ्गमः ।
कार्त्तिकेयस्तथादित्यो मातरो दुर्गया सह ॥
दिशो धनपतिर्विष्णुर्धर्म्मो रुद्रः शशी तथा ।
पितरश्चेति संभूताः प्राधान्येन जगत्पतेः ॥
हिरण्यगर्भस्य तनौ सर्व्व एव समुद्भवाः ।
पृथक् पृथक् ततो गर्व्वं वहमानाः समन्ततः ॥
अहं योग्यस्त्वहं याज्य इति तेषां स्वनो महान् ।
श्रूयते देवसमितौ क्षुब्धसागरसन्निभः ॥
तेषां विवदमानानां वह्निरुत्थाय पार्थिव ।
उवाच मां यजध्वेति ध्यायध्वं मामिति ब्रुवन् ॥
प्राजापत्यमिदं नूनं शरीरं महिना कृतम् ।
विनाशमुपपद्येत यतो नाहं महानहम् ॥
एवमुक्त्वा शरीरन्तु त्यक्त्वा वह्निर्व्विनिर्ययौ ।
निर्गतेऽपि ततस्तस्मिंस्तच्छरीरं न शीर्य्यते ॥
ततोऽश्विनौ मूर्त्तिमन्तौ प्राणापानशरीरगौ ।
आवां प्रधानाविश्वेवमूचतुर्याव्यवस्तरौ ॥
एवमुक्त्वा शरीरं तौ विहाय क्वचिदास्थितौ ।
तयोरपि क्षयं ज्ञात्वा चौणं तत्पुरमास्थितः ॥
ततश्चैवाब्रवीद्गौरी प्राधान्यमपि संस्थितम् ।
साप्येवमुक्त्वा क्षेत्रात्तु निश्चक्राम बहिः शुभा ॥
तया विनापि तत् क्षेत्रं वागूनं व्यवतिष्ठते ।
ततो गणपतिर्व्वाक्यमाकाशाख्योऽब्रवीत्तदा ॥
न मया रहितं किञ्चिच्छरीरस्थोऽपि दूरतः ।
कालान्तरेण्येवमुक्त्वा सोऽपि निष्क्रम्य देहतः ॥
पृथग्भूतस्तथाप्येतच्छरीरं नाप्यनीनशत् ।
विना सौख्यञ्च तत्त्वेन तथापि न विशीर्य्यते ॥
शुषिरैस्तु विहीनन्तु दृष्ट्वा क्षेत्रं व्यवस्थितम् ।
शरीरधातवः सर्व्वे ते ब्रूयुर्व्वाक्यमेव हि ॥
अस्माभिर्व्यतिरिक्तस्य न शरीरस्य धारणम् ।
भवतीत्येवमुक्त्वा ते जहुः सर्व्वे शरीरिणः ॥
तैर्व्यपेतमपि क्षेत्रं पुरुषेण प्रपाल्यते ।
तद्दृष्ट्वा त्वब्रवीत् स्कन्दः सोऽहङ्कारः प्रकी-
र्त्तितः ॥
मया विना शरीरस्य सम्भूतिरपि नेष्यते ।
एवमुक्त्वा शरीरात्तु सोऽपेतः पृथक् स्थितः ॥
तेनाप्यतेन तत् क्षेत्रं विना मुक्तवदास्थितम् ।
तद्दृष्ट्वा कुपितो भानुः स आदित्यः प्रकीर्त्तितः ॥
मया विना कथं क्षेत्रमिमं क्षणमपीष्यते ।
एवमुक्त्वाथ यातः स तच्छरीरं न शीर्य्यते ॥
ततः कामादिरुत्थाय गणो मातृकसंज्ञितः ।
न मया व्यतिरिक्तस्य शरीरस्य व्यवस्थितिः ॥
एवमुक्त्वा स यातस्तु शरीरं तन्न शीर्य्यते ।
ततो मायाब्रवीत् कोपात् सा च दुर्गा प्रकी-
र्त्तिता ॥
न मयास्य विना भूतिरित्युक्त्वान्तर्दधे पुनः ।
ततो दिशः समुत्तस्थुरूचुश्चैव वचो महत् ॥
नास्माभी रहितं कार्यं भवतीत्थं न संशयः ।
चतस्र आगताः काष्ठा अपयाताः क्षणात्तदा ॥
ततो धनपतिर्व्वायुर्मध्ये तत्यक्तसम्भवः ।
शरीरस्येति सोऽप्येवमुक्त्वा मृद्धानगोऽभवत् ॥
ततो विष्णोर्मनो ब्रूयात् नायं देहो मया विना ।
क्षणमप्युत्सहे स्थातुमित्युक्त्वान्तर्दधे पुनः ॥
ततो धर्म्मोऽब्रवीत् सर्व्वमिदं पालितवाहनम् ।
इदानीं मय्युपगते कथमेतद्भविष्यति ।
एवमुक्त्वा गते धर्म्मे तच्छरीरं न शीर्य्यते ॥
ततोऽब्रवीन्महादेवस्त्वव्यक्तो भूतनायकः ।
महत्संज्ञो मया हीनं शरीरं नो भवेद्यथा ॥
एवमुक्त्वा गतः शम्भुस्तच्छरीरं न शीर्य्यते ।
तद्दृष्ट्वा पितरश्चोचुस्तन्मात्रा यावदस्मभिः ॥
शाणान्तरेभिरेतच्च शरीरं शीर्य्यते ध्रुवम् ।
एवमुक्त्वा तु तं देहं त्यक्त्वान्तर्द्धानमागताः ॥
अग्निः प्राणः अपानश्च आकाशश्चैव धातवः ।
क्षेत्रं तद्वच्चहंकारो भानुः कामादयो मया ॥
काष्ठा वायुर्व्विष्णुधर्म्मौ शम्भुश्चैवेन्द्रियार्थकाः ।
एतैर्मुक्तन्तु तत् क्षेत्रं सुक्ताविव सुसंस्थितम् ॥
सोमेन पाल्यमानन्तु पुरुषेणेन्दुरूपिणा ।
एवं व्यवस्थिते सोमे षोड़शात्मन्यथाचरे ॥
शाश्वतत्र गुणोपेतं क्षेत्रमुत्थाय यद्भवेत् ।
प्रागवस्थं शरीरन्तु दृष्ट्वा सर्व्वप्रपालितम् ॥
ताः क्षेत्रदेवताः सर्व्वा वैलक्ष्यं भावमाश्रिताः
तमेवं तुष्टुवुः सर्व्वास्तं देवं परमेश्वरम् ॥"

इति वाराहे महातपोपाख्याननामाध्यायः ॥ * ॥

शरीराग्नं यथा,—

"शरीरमापः सोमश्च विविधं चान्नमुच्यते ।
प्राणो ह्यग्निस्तथादित्यश्चिभोक्ता एक एव तु ॥"

इति गारुड़े २१५ अध्यायः ॥ * ॥

मानसकायिकक्लेशसाध्यव्रतं यथा,—

धरण्युवाच ।
"कथमाराध्यसे देव भक्तिमद्भिर्नरैर्विभो ।
स्त्रीभिर्व्वा सर्व्वमेतन्मे शंस त्वं भूतभावन ॥
वाराह उवाच ।
भावसाध्यस्त्वहं देवि न वित्तैर्न जपैरहम् ।
साध्यस्तथापि भूतानां कायक्लेशं वदामि ते ॥
कर्म्मणा मनसा वाचा मच्चित्तो यो नरो
भवेत् ।
तस्य व्रतानि वक्ष्येऽहं विविधानि निबोध मे ॥
अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यमकल्कता ।
एतानि मानसान्याहुर्व्रतानि तु धराधरे ॥
एकभक्तं तथा नक्तमुपवासादिकञ्च यत् ।
तत् सर्व्वं कायिकं पुंसां व्रतं भवति नान्यथा ॥"

इति वाराहे सत्यतपोपाख्याननामाध्यायः ॥

शरीरजः, पुं, ( शरीरात् जायते इति । जन+ डः । ) रोगः । कामदेवः । ( यथा, महाभारते । १ । १०० । ५६ ।